**दिनाङ्क :- 06.10.2026**

**प्रात: - 06:55**

## स्विजरलैंड राष्ट्रपति आगमन

नवदेहल्यां प्रधानमन्त्रिणः श्रीनरेन्द्रमोदिनः स्विस-राष्ट्रपतिना गाय पार्मिलेन इत्यमुना सह मन्त्रणानन्तरं पञ्च-सहमति-पत्राणि हस्ताक्षरितानि। अत्रावधेयं यत् संधयः तावत् जन-प्रवासाय, युव-व्यावसायिक-विनिमयाय, परिवहन-प्रौद्योगिकी-विकासाय च भविष्यन्ति। प्रधानमन्त्री अवदत् यत् उभौ देशौ रक्षा-सहयोगे नूतन-क्षेत्राणाम् अन्वेषणं विधास्यतः, परमाणु-ऊर्जा-क्षेत्रे च परस्पर-सम्बन्धम् अत्यन्तं सुदृढं करिष्यतः।

## उपराष्ट्रपतिः संस्कृत-विश्वविद्यालयस्य

नवदेहल्यां श्री लाल-बहादुर-शास्त्री-राष्ट्रिय-संस्कृत-विश्वविद्यालयस्य द्वितीये दीक्षान्त-समारोहे उपराष्ट्रपतिः सी. पी. राधाकृष्णन् अद्य मंगलमयं दीक्षान्त-भाषणं समाचरिष्यति। आकाशवाण्याः वार्ताहरैः सह सम्भाषणे विश्वविद्यालयस्य कुलपतिः प्रोफेसर-मुरलीमनोहर-पाठकः सहर्षं विज्ञापितवान् यत् अस्मिन् मङ्गलमये दीक्षान्त-महोत्सवे त्रयोदशाधिकैकसहस्रतोप्यधिकाः छात्र-साधकाः सहभागिनः भविष्यन्ति। कुलपतिना संसूचितं यत् शैक्षणिक-विद्या-साधनायां सर्वाग्रणीभ्यः त्रिभ्यः मेधावि-छात्रेभ्यः उपराष्ट्रपति-करेभ्यः प्रतिष्ठितं 'शङ्कर-दयाल-शर्मा-पदकम्' अर्पयिष्यते। अस्मिन् भव्य-विद्या-समारोहे चत्वारिंशदुत्तरद्विशत छात्राः विद्या-वारिधि उपाधिभिः विभूषयिष्यन्ते।

## मतगणना

तमिलनाडु-पुदुच्चेरी-पश्चिमबङ्गाल-राज्येषु पञ्च-विधानसभासनेषु तथा असमस्य नागांव-लोकसभा-आसने अद्य शान्तिपूर्णं मतदानं प्रचलति। निर्वाचनायोगानुसारं मतगणना आगामि-शुक्रवासरे सम्पादयिष्यते, यस्य फलं तस्मिन्नेव दिने उद्घोषितं भविष्यति।

## राष्ट्रपति-हिमाचल प्रदेशस्य दौरा

राष्ट्रपतिपदासीना द्रौपदी मुर्मूः अद्य प्रभृति हिमाचल-प्रदेशस्य त्रि-दिवसीय-प्रवासे भविष्यति। यात्रावधौ राष्ट्रपतिः 'एम्स-बिलासपुर' संस्थायाः दीक्षान्त-समारोहे मुख्य-अतिथित्वेन प्रशिक्षित-चिकित्सकेभ्यः उपाधीन् प्रदास्यति।

## ऋतुविज्ञान

भारतीय-ऋतुविज्ञान-विभागेन अद्य केरल-माहे-दक्षिण-कर्णाटक-तमिलनाडु-पुदुच्चेरी-करैकल-क्षेत्रेषु अतिवृष्टिपरा संचेतना प्रकटिता। विभागेनानेन संसूचितं यत् आगामि-दिन-द्वये त्रये वा जम्मू-कश्मीर-लद्दाख-हिमाचल-पञ्जाब-चण्डीगढ-हरियाणा-दिल्ली-उत्तराखण्ड-लक्षद्वीप-प्रान्तेषु विद्युत्-पातपुरस्सरं मेघ-गर्जनं च सम्भाव्यते।

## यमन

यमन-देशस्य मान्यता-प्राप्तेन शासनेन हूती-विद्रोहिणां विरुद्धं 'यमन-अरुणोदयः' (Operation Dawn of Yemen) इति बृहत्-सैन्य-अभियानं प्रारब्धम्। शासकीय-बलैः

रक्ताब्धि-तटस्य मुख्य-स्थानेषु अग्रगतिः प्राप्ता। अभियानस्यास्य मुख्यम् उद्देश्यं हूती-नियन्त्रितानां भू-भागानां पुनरधिग्रहणम्, शासकीय-संस्थानां पुनर्स्थापना, हूती-वशे वर्तमानायाः सना-राजधान्याः पुनः स्वायत्तीकरणम् अस्ति।

**<u>टी-20-श्रृङ्खलायाः</u>**

पञ्च-स्पर्धानाम् अस्याः टी-20-श्रृङ्खलायाः प्रथमं सम्मुखीकरणम् अद्य लखनऊ-नगरस्य 'एकाना-क्रीडाङ्गणे' सायं सप्त-वादनात् प्रारप्स्यते। एशियाई-क्रीडासु स्वर्ण-पदक-विजयात् परम् आयोजक-भारतीय-दलं स्वीयां विजय-यात्रां निरन्तरं विधातुम् उद्यतं वर्तते।

अपरतः वेस्ट-इण्डीज-दलेन हेटमायर-पॉवेल-शेफर्ड सदृशाः प्रहारक-क्रीडकाः समाविष्टाः। श्रृङ्खलायाः अग्रिमाः स्पर्धाः तावत् राँची, इन्दौर, हैदराबाद, बेङ्गलूरु-नगरेषु समायोजयिष्यन्ते।